M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 175

Title: Parthiv Pooja

173

Pārthiva Pooja		Title
		Author
		Editor
Śaka 1795		Year, Vols.
		Publisher
173		Remarks

श्रीगणेशायनमः अथपार्थिवपूजाप्रारंभः ॥ आचम्य ॥ स्व
मुखश्वेत्यादिशुभपुण्यतिथौमम चतुर्विधपुरुषार्थसिध्य
र्थंश्रीसांबसदाशिवचरणप्रसादसिध्यर्थंयथामिलितोपचा
रैःपार्थिवलिंगपूजांकरिष्ये॥ तदंग आसनादिकलशारा
धनंचकरिष्ये॥ पृथ्वीतिमंत्रस्य॥ मेरुपृष्ठऋषिः॥ कूर्मोदे
वतासुतलंछंदः॥ आसनेवि०॥ पृथ्वीत्वयाधृता० दातुमर्ह
सि॥ मूलमंत्रेणन्यासः॥ अंगुष्ठाभ्यांनमः॥ तर्जनीभ्यां०॥
मध्यमाभ्यां०॥ अनामिकाभ्यां०॥ कनिष्ठिकाभ्यां०॥ करत
लकरपृष्ठाभ्यां०॥ नमःशिवायहृदया०॥ शिरसेस्वाहा॥

शिखायैवषट् ॥ कवचायहुं ॥ नेत्रत्रयायवौषट् ॥ अस्त्रायफ
ट् ॥ कलशशंखघंटापूजनं ॥ कलशस्यमुखे० ॥ वरुणा
यनमः सकलपूजार्थेगंधाक्षतपुष्पंसमर्पयामि ॥ शंखा
दौचंद्रदेव० ॥ शंखदेवताभ्योनमः गंधाक्षतपुष्पं० ॥ आगमा
र्थंतुदेवानां० ॥ घंटादेव्यैनमः गंधा० ॥ अपवित्रः पवित्रो० ॥
पूजाद्रव्याणिप्रोक्ष्य ॥ आत्मानंप्रोक्ष्य ॥ प्राणप्रतिष्ठांकृत्वा ॥
अस्यश्रीप्राणप्रतिष्ठामंत्रस्य ॥ ब्रह्मविष्णुमहेश्वराऋषयः
ऋग्यजुःसामाथर्वाणिछंदांसि ॥ पराप्राणशक्तिर्देवता ॥
आंबीजं ॥ ह्रींशक्तिः ॥ क्रौंकीलकं ॥ प्राणप्रतिष्ठापनेवि० ॥

ॐ आंह्रींक्रों ॥ यंरंलंवंशंषंसंहोंहंसः सोहं ॥ क्रोंह्रींआं ॥
अस्याः पार्थिवलिंगमृन्मयमूर्तेः प्राणइहप्राणाः ॥ ॐ आं
ह्रींक्रों ॥ यंरंलं० मूर्तेः जीवइहस्थिताः ॥ ओंआंह्रींक्रोंयं
रंलंवं० मूर्तेः सर्वेंद्रियाणि ॥ ॐ आंह्रींक्रों यंरंलं० क्रोंह्रीं
आं अस्याः पार्थि० मूर्तेः वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्रा
पापाणिपादपायूपस्थइहैवागछंसुखंचिरंतिष्ठंतुस्वाहा ॥
गर्भाधानादिपंचदशसंस्कारसिध्यर्थंपंचदशप्रणवा
वृत्तिः करिष्ये ॥ ॐ १५ ॥ अस्यैः प्राणाः प्रतिष्ठंतु अस्यैः
प्राणाः क्षरंतुच ॥ अस्यैदेवत्वमर्चायैमामहेतिचकश्चन ॥

ध्यायेंनित्यंमहेशंरजतगिरिनिभंचारुचंद्रावतंसं ॥
रत्नाकल्पोज्वलांगंपरशुमृगवराभीतिहस्तंप्रसन्नं ॥
पद्मासीनंसमंतात्स्तुतिममरगणैर्व्याघ्रकृत्तिंवसानं ॥
विश्वाद्यंविश्ववंद्यंनिखिलभयहरंपंचवक्त्रंत्रिनेत्रं ॥
मूलमंत्रेणध्यायेध्यानार्थेअक्षतांत्समर्पयामि ॥ आ
सनार्थेअक्षतां० ॥ पादयोः पाद्यंस० ॥ अर्घ्यंस० ॥ आच
मनीयंस० ॥ स्नानंस० ॥ पंचामृतस्नपयिष्ये ॥ पयस्ना
नंसम० ॥ पयस्नानानंतरेणशुद्धोदकस्नानंस० ॥ आ
चमनीयंस० ॥ सकलपूजार्थेअक्षतान्त्समर्प० ॥ १

दधिस्नानसमं० ॥ दधिस्नानानंतरेणशुद्धोकस्नानंस० ॥ सक
लपूजार्थेअक्षतान्स० ॥ २ ॥ घृतस्नानंसम० ॥ घृतस्नानानं०
सकलपूजार्थेअक्ष० ॥ ३ ॥ मधुस्नानंस० ॥ मधुस्नानानंत०
सकलपूजार्थेअ० ॥ ४ ॥ शर्करास्नानंस० ॥ शर्करास्नानानं०
सकलपूजार्थेअक्ष० ॥ ५ ॥ पश्चेनशुद्धगंधोदकस्नानंसं० ॥ शु
द्धोदकस्नानंस० ॥ आचमनीयंस० ॥ वस्त्रोपवस्त्रार्थेअक्ष०
यज्ञोपवीतार्थेअक्ष० ॥ विलेपनार्थेचंदनंस० ॥ सर्वालंक
रणार्थेअक्ष० ॥ पूजार्थेपुष्पाणिस० ॥ धूपंसम० ॥ दीपंस०
नैवेद्यार्थेअमुकनैवेद्यंस० ॥ नैवेद्यात्पूर्वंक आचमनी

 यंस०॥ प्रोक्ष्य॥ प्राणायनमः॥ अपाना०॥ व्याना०॥ उदाना०
 समाना०॥ ब्रह्मणे०॥ नैवेद्यमध्येपानीयंस०॥ उत्तरापोशनं०
हस्तप्रक्षालनंस०॥ मुखप्रक्षालनंस०॥ करोद्वर्तनार्थे चंद०॥ मु
मुखवासार्थेपूगीफलतांबूलंस०॥ सुवर्णपुष्पदक्षिणांसम०॥ क
र्पूरनीरांजनदीपंस०॥ सर्वोपचारार्थेमंत्रपुष्पंस०॥ प्रदक्षिणां
स०॥ नमस्कारान्स०॥ अद्यपूर्वो० तिथौमम चतुर्विधपु
रुषार्थसिध्यर्थंश्रीसांबसदाशिवचरणप्रसादसिध्यर्थं
शिवपार्थिवपूजांगत्वेनमूलमंत्रेण अष्टोत्तरशतसंख्या
जपमहंकरिष्ये॥ ध्यानं॥ ध्यायेन्नित्यंमहेशंरज०॥१॥

मालेमालेमहामायेसर्वशक्तिस्वरूपिणी॥ चतुर्वर्गस्त्वयं
नित्यंतस्मान्मेसिध्दिदाभव॥ ह्रींसिध्यैनमः॥ सिद्धिंकुरु
अविघ्नंकुरुमालेत्वंजपकालेसदामम॥ सिध्दिंमेदेहिस
तत्तंदेवतापीतिकारके॥१॥ जपंकृत्वा॥१०८॥ ॐमाले त्वं
सर्वदेवानांप्रीतिदाशुभदाभव॥ शुभंकुरुष्वमेभद्रेयशो
वीर्यंचसर्वदा॥ मालांशिरसिधार्यते॥१॥ प्रार्थना॥ क
रचरणकृतंवाकायजंकर्मजंवाश्रवणनयनजंवामान
संवापराधं॥ विहितमविहितंवासर्वमेतत्क्षमस्व जय
जयकरुणाब्धेश्रीमहादेवशंभो॥ प्रार्थनांसमर्प०॥

यस्यस्मृत्या च नामो॰॥ अनेनशिवपार्थिवपूजाख्येनकर्म
णा तेन श्रीसांबसदाशिवः प्रीयतांनमम॥ तत्सद्ब्रह्मार्पण
मस्तु॥ यांतुदेवगणाः सर्वेपूजामादायपार्थिव॥ इष्टका
मप्रसिध्यर्थंपुनरागमनाय च॥ इतिविसृज्य॥ ॥
आम्यप्राणानायम्य॥ अद्यपूर्वो॰ तिथौमम चतुर्विधपु
रुषार्थसिध्यर्थं श्रीसांबसदाशिवचरणप्रसादसिध्यर्थं
श्रीशिवसाक्षात्कारपूर्वकं श्रीशिवपंचाक्षरीमहामंत्रस
हस्रसंख्याजपमहंकरिष्ये॥ तदंगन्यासादि करिष्ये॥ ४
मूलमंत्रेण न्यासांकुर्यात्॥ अंगुष्ठाभ्यांनमः॥ तर्जनी॰

मध्यमाभ्यां॰॥ अनामिका॰॥ कनिष्ठिका॰॥ करतलकरपृ॰
हृदयाय॰॥ शिरसेस्वाहा॥ शिखायैवषट्॥ कवचायहुं॥
नेत्रत्रयायवौषट्॥ अस्त्रायफट्॥ ध्यानं॥ ध्यायेन्नित्यंम
हेशं॰॥ १॥ भवानीशंकरमहारुद्रदेवताभ्योंनमः॥ लंपृ
थिव्यात्मकं गंधंपरिकल्पयामि॥ हंआकाशात्मकं पुष्पंपरि
कल्पयामि॥ यंवाय्वात्मकं धूपंप॰॥ रंअग्न्यात्मकं दीपंप॰
वंअमृतात्मकं नैवेद्यंपरि॰॥ संसर्वशक्तिप्रकृत्यात्मकं तां
बूलं मंत्रपुष्पं च परिकल्पयामि नमः॥ ॥ माले माले महा॰
॥१॥ ह्रींसिध्यैनमः॥ सिद्धिंकुरु॥ अविघ्नं कुरु माले॰॥ १॥

पा०पू० जपंकृत्वा॥१०००॥त्वंमालेसर्व०॥१॥ मालांशिरसिधार्यते॥
८ मूलमंत्रेणजपांतेषडंगहृदयादिन्यासः॥ एवंहृदि॥ ध्यानं
॥ध्यायेन्नित्यंमहे०॥१॥ मानसोपचारैः संपूज्य॥ ॐ गु
ह्यातिगुह्यगोप्तात्वंगृहाणास्मत्कृतंजपं॥ सिद्धिर्भवतुमे
देवत्वत्प्रसादान्महेश्वर॥ यस्यस्मृत्याचनामोक्त्या०॥१॥
अनेनशिवपंचाक्षरीमहामंत्रसहस्रसंख्याजपाख्येन
कर्मणाभगवान्भवानीशंकरमहारुद्रदेवताप्रीयतां॥
तत्सद्ब्रह्मा०॥ आसनस्थदेवताः व्याहृतयः यथायथंस्था ८
नानिगच्छंतु॥ विलोमेनकार्यं॥ शाके १७९८॥ ८॥